पुरश्चरणकमलम्

(संस्कृतनाटकम्)

प्रणेता

डा० रमाकान्त शुक्लः

देववाणी-परिषद्, दिल्ली

आर ६ वाणी-विहारः, नयी दिल्ली - ११००५६

'पुरश्चरणकमलम्'

(संस्कृतनाटकम्)

लेखक :

डा० रमाकान्त शुक्लः

१९८३

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

'पुरश्चरणकमलम्'

(संस्कृतनाटकम्)

लेखकः : डा० रमाकान्त शुक्लः

प्रकाशिका : देववाणी-परिषद्, दिल्ली
६, वाणी-विहार, नयी दिल्ली-११००५९

मुद्रकः : देववाणी प्रिण्टर्स
उत्तम नगर, नयी दिल्ली-११००५९

संस्करणम् : प्रथमम् १९८३

मूल्यम् : दश रूप्यकाणि रु० १०.००

वितरकः : देववाणी-प्रकाशनम्
६ वाणी-विहारः, नयी दिल्ली-११००५९

Puraścaraṇakamalam

(Sanskrit Play)

Author : Shukla, Dr. Rama Kant

Publisher : Devavani Parishad, Delhi
6, Vani Vihar, New Delhi-110059

Printer : Dev Vani Printers
Uttam Nagar, New Delhi-110059

Edition : First, 1983

Price : Rupees Ten only Rs. 10-00

सुख्यातसमालोचकानाम् दिल्ली-विश्वविद्यालयस्य
प्राक्तन हिन्दी-विभागाध्यक्षाणाम् 'पद्मभूषण'-
आचार्य डा० नगेन्द्र महाभागानाम्

अभिमतम्

'राम की शक्तिपूजा' आधुनिक हिन्दी कविता की उपलब्धि का मानदण्ड है। कथा-काव्य होने पर भी इसमें नाट्य तत्त्वों का अत्यन्त कलात्मक रूप से विनियोग किया गया है। डा० रमाकान्त शुक्ल ने इस रहस्य को पहचानते हुए निराला की इस अमर कृति का 'पुरश्चरणकमलम्' के रूप में संस्कृत नाट्यरूपान्तर प्रस्तुत किया है।

'राम की शक्तिपूजा' जैसी प्रबल रचना के आन्तरिक तथा अभिव्यक्तिगत ओज की रक्षा करते हुए इसकी नाट्य सम्भावनाओं के सम्यक् विकास का प्रयत्न अपने आपमें जोखिम का काम है। डा० शुक्ल ने इस प्रकार का साहस किया है और इसमें उन्हें काफी सफलता मिली है।

मुझे विश्वास है कि संस्कृत के सुधी पाठक प्रस्तुत रचना के माध्यम से हिन्दी के काव्य-वैभव का परिचय, कम से कम सांकेतिक रूप में, अवश्य प्राप्त कर सकेंगे।

ई ४/१८, माडल टाउन, दिल्ली-११०००९ —नगेन्द्र
३०-१२-१९८३ ई०

प्रास्ताविकम्

देववाणी-परिषदस्तत्त्वावधाने समायोजिते संस्कृतनाट्यसमारोहे ३०-१२-१९८३ ई० तारिकायां नवदिल्ल्यां 'श्रीराम सेण्टर फार आर्ट एण्ड कल्चर' इत्येतस्मिन् प्रेक्षागारे सुश्रीकमलिनीदत्त-महाभागाया निर्देशने 'पुरश्चरणकमलम्' प्रयुक्तं सञ्जातम् । अस्मिन्ननुष्ठाने श्रीबलदेवानन्दसागरः श्रीरमणकुमार शर्मा, श्रीविश्वनाथ शर्मा, कु० शशिबाला गुप्ता, श्रीशशिपालशर्मा, श्रीगणेशप्रसादः, मालती गुप्ता, श्रीजयशंकरः, श्री चन्द्रमौलिशुक्लः, श्री राजेश आहूजा, श्रीगोवर्धनसेमवाल , श्रीकेदारदत्तशास्त्री, श्रीभूपेन्द्रपुरोहित इत्यादयः कलाकाराः सहभागित्वं निरवहन् । सर्वप्रथममहमेतेभ्यः सर्वेभ्योऽपि कृतज्ञतां साधुवादाँश्च व्याहरामि येषां परिश्रमेण सर्वप्रथममस्याभिनयः समभवत् । पुनश्च संगीतनिर्देशकं श्री छोटेलाल-महाभागं श्री बर्म्मन-पवननायडू-मतलूबहुसैनप्रभृतीन् तत्सहयोगिनश्च, प्रकाशयोजकं श्री नरेन्द्रकुमारसूरी-महाभागं, रङ्गसज्जाकारं श्री एच० एस० रावतमहाभागं, प्रसाधकं श्री नरेशखरेमहाभागं, वेशभूषाकारं श्री ए० बिन्दलमहाभागं पार्श्वोद्घोषकं श्री कुबेरदत्तं, मञ्चव्यवस्थापकं श्री अनिल कोचरञ्च साधुवादैः सभाजयामि येषां सहयोगेनास्य नाटकस्य प्रस्तुतिः प्रभावकरी सञ्जाता । रवेरस्तंगमनम्, समुद्रस्य गर्जनम् आकाशे अञ्जनाया उदयः, 'फ्लेशबैक'पद्धत्या रामवन-गमनादि - दृश्यसंयोजनं - सर्वमप्येतद्यथा सहृदयहृदयावर्जकं संवृत्तं तत्रैतपां परिश्रम एव कारणम् ।

अथ 'पुरश्चरणकमलस्य' रचनामवलम्ब्य किञ्चिन्निवेदयामि । । २५-१-१९८३ तारिकायां यदा 'देववाणी-परिषद्, दिल्ली' - समायोजित संस्कृतनाट्यसमारोहे, १९६९ तमेशवीयेऽब्दे मया रचितं किञ्च आकाशवाण्या

दिल्लीकेन्द्रात् १२-१२-१९६९ ई० तारिकायां प्रसारितं, 'पण्डितराजीयम्' नाम ध्वनिरूपकं मञ्चनाटकरूपेण श्रीमत्या कमलिनीदत्तमहाभागाया निर्देशने प्रयुक्तमभूत्तदनन्तरमेकस्मिन् दिने, नाट्य - कलाकाराणां सम्मुखे मया पं० सूर्यकान्त त्रिपाठि 'निराला' विरचिता 'राम की शक्तिपूजा' पठिता। तस्मिन्नेव काले कमलिनीदत्तमहाभागया अन्यैश्च बलदेवानन्दसागर-विश्वनाथ-शर्म - शशिबाला गुप्तादिभिरहं कविताया अस्याः संस्कृतनाट्यरूपान्तरं विधातुं प्रेरितः; मयापीदं कार्यमुररीकृतम्। मया बहुशः पठितमासीत् यद् हिन्दी-समालोचकैरस्याः कविताया नाटकीयता प्रशंसिता किन्तु केनापि हिन्दी-लेखकेनास्याः कविताया हिन्दीनाट्यरूपान्तरं नाद्यावधि कृतमासीत्। मया संस्कृतमाध्यमेनास्या नाट्रूपान्तरं चिकीर्षितम्। भगवत्कृपया इदं सम्पन्नम्। यतो हि नायं काव्यानुवादोऽस्तीति कृत्वा यत्किञ्चिदतिरिक्तमप्यत्र कथ्यं संयोजितम् किन्तु मूलकवितानुरोधि एव। अस्य हिन्दीनाट्यरूपान्तरमपि मया कृतं यच्च पाठकानां पुरतः शीघ्रमेव आयास्यतीति विश्वस्यते।

सुख्यातसमालोचकैराचार्यनगेन्द्रमहाभागैः स्वव्यस्तेऽपि कार्यक्रमे इयं कृति-राद्यन्तं श्रुता अथ चैतद्विषये स्वाभिमतं प्रकटीकृतमिति तान् प्रति भूयो भूयः स्व कार्तज्ञं ज्ञापयापि।

अन्ते चाहं महाप्राणस्य निरालाकवेः पुण्यस्मरणं विदधामि यद्रचनया भृशं प्रभावितः सन्निमां कृतिं व्यरचयम्।

विदुषां वशंवदः



३१.१२.१९८३ ई० (डा० रमाकान्त शुक्लः)

६, वाणी-विहारः, नयी दिल्ली-११००५९

पात्राणि

१. रामः

२. लक्ष्मणः

३. हनूमान्

४. जाम्बवान्

५. विभीषणः

६. अञ्जना

७. देवी महाशक्तिः

८. नल-नील-गवाक्षाङ्गद-सुग्रीव-वानरवीराः

रमाकान्तशुक्लप्रणीतं नाटकम्

पुरश्चरणकमलम्

"निराला"कृत-"राम की शक्तिपूजाया:" संस्कृतनाट्यरूपान्तरम्

(पूर्वरङ्ग-नान्द्यन्ते नेपथ्यतो वाचकध्वनिः श्रूयते)

वाचकः : रविरस्तमगात्, ज्योतिष्पटले लिखितं ह्यमरम्,
अद्यतनं स्थगितं श्रीराघवरावणसमरम्,
अत्यन्ततीक्ष्णशरपातयुतं वेगप्रखरं,
शतशैलसंवरणशीलं पूरितनभस्स्वरं,
प्रतिपलव्यूहपरिवृत्तियुतं कौशलभरितम्,
राक्षसविरुद्धप्रत्यूहकुपितकपिहूह - कृतम्,
राघवलाघव - रावणवारण - गतद्विप्रहरं,
उद्धतलङ्कापतिमर्दितकपिदलबलप्रसरं,
अनिमेषरामविश्वजिद्दिव्यशरभङ्गकरं
खररुधिरस्रावं, विद्धयोद्धृनिर्भयनिकरं,
रावणप्रहारदुर्वारविकलवानर - दल - बल-
मूर्च्छितसुग्रीवाङ्गदभीषण-गवाक्ष - गय - नल-
सौमित्रभल्लपति - वारितागणितमल्लरोध-
गर्ज्जत्प्रलयाब्धिक्षुब्धहनूमन्मात्रबोध-
मुद्गोरितवह्निभीमपर्वतकपियत्नकरं,
जानकीभीरुहृदयाशादं विकटं समरम् ।
युगदलौ निवृत्तौ; राक्षसपादैश्चलिता भूः,
उल्लासविद्ध आकाशो नितरां विकलोऽभूत् ।
रघुपतिपदचिह्नविलोकनखिन्ना कपिसेना
शिविरं प्रति चलिता स्थविरावली यथा भिन्ना !

रघुपतिमनुयाति लक्ष्मणस्तं वानरवीराः।
चिन्ताचुम्बितचिताः सर्वे यद्यपि धीराः॥
सम्प्राप्ताः पर्वतशिखरे सर्वे विश्रान्ताः।
सुग्रीवविभीषणजाम्बवदादिकविक्रान्ताः॥
नलनीलगवाक्षांगदमारुतिप्रमुखाः वीराः
रामं परितस्तिष्ठन्ति मनस्युत्का धीराः।

(वाचकध्वनिमनुरुद्ध्य युद्धस्थलानिवर्तमानं खिन्नं रामदलम्। रामदलवीराः पर्वतशिखरे मन्थरगत्या आयान्ति। तिष्ठन्ति। परामर्शं कर्तुं प्रारभन्ते। हनूमान् पादप्रक्षालनार्थं जलमानयति।

श्रीरामः : (सुग्रीव - विभीषण - जाम्बवदगद - नल - नील-गवाक्षान् प्रति) वीराः, ननु गच्छन्तु सन्ध्योपासनांमनुष्ठातुम्। प्रतिनिवर्तने भवतां, भाविनो रणस्य विषये परामर्शं करिष्यामः।

(सर्वे गच्छन्ति। हनूमान् तिष्ठति)

लक्ष्मणः : आर्य ! किं चिन्त्यते ?

श्रीरामः : वत्स लक्ष्मण ! अद्यतनं युद्धमेव विचिन्तयामि ! मया किं किं शरसन्धानकौशलमद्य न प्रदर्शितम्, किन्तु सकलमपि निष्फलमेव संजातम् ! रावणस्य दुर्वार-प्रहारैर्वानरा विकला अजायन्त। केवल हनूमानेव युद्धे प्रबोधं भजते स्म, अन्ये तु आस्माकीना वानरवीरा मूर्च्छिता एवाभवन्। रणस्थलात् प्रत्यावर्तनवेलाया-महमिव तेऽपि खिन्नतां श्रान्तिं चानुभवन्त आसन्। श्वः किं भविष्यति ? —इत्येव चिन्ता मां दुनोति।

लक्ष्मणः : आर्य ! अलं चिन्तया ! संकटकाले धैर्यं न त्याज्यम्। दृढनिश्चयेन, अध्यवसायेन श्रमेण च नूनं वयमन्यायपरं

रावणं जेष्यामः, आर्यां जानकीं च तस्मान्नीचापसदान्मोचयिष्यामः। जय-पराजयौ तु रणस्थले भवत एव। अद्य यदि रावणो विजयी इव दृश्यते तर्हि श्वः स पराजितोऽपि भवितुं शक्नोति। आर्येणैवं दैन्ये समालम्बिते सति अन्येषां वीराणां का दशा भवेदित्यार्येण विचारणीयम्। नन् सेनापतेरेव मनोबलेन सैनिकानां मनोबलं वर्धते।

श्रीरामः लक्ष्मण! दैन्यं नावलम्बे, नापि धैर्यं त्यजामि, अपि तु यथार्थं परिशीलयामि। अद्य युद्धे उद्धतलङ्केशपतिना यथा कपिदलबलं मर्दितं तत्स्मारं स्मारं तु इदमेव प्रतीयते यद्रावणोऽजेयः संवृत्तः। कथमधुना जानकीं विमोचयिष्यामि कथं च अयोध्यावासिनः स्वमुखं दर्शयिष्यामि-इति चिन्ता दुनोति मे मानसम्!

(कृतसन्ध्योपासनानां वानरवीराणामागमनम्)

आगच्छन्तु वीराः। तिष्ठन्तु।

(वीरास्तिष्ठन्ति। जाम्बवान्, विभीषणः सुग्रीवः सम्मुखं तिष्ठन्ति। पद-प्रान्ते हनूमान् प्रथमत एव तिष्ठति) सर्वे श्रान्तिं रूपयन्ति)

कथमनुभूतमद्यतनं युद्धम्! श्वो युद्धे गन्तुमुत्सहन्ते अत्रभवन्तः?

सर्वे : अवश्यम्!

वीरः (१): रणात्पलायनं तु कादराणां स्वभावः,न तु वीराणाम्।

वीरः (२): ताटका - सुबाहु - विराध-- त्रिशिरा - खरदूषणान्तकस्य श्रीरघुवीरस्य सहायका वीराः सन्ति न तु कादराः।

जाम्बवान् : भगवती जानकी प्रतीक्षते भवद्दर्शनम् औत्सुक्येन!

श्रीरामः : जानकि !

('फ्लैशबैक' - पद्धत्या पुष्पवाटिका-जयमाला-वनगमन-दृश्यानां प्रत्यायनम् । अशोकवाटिकायां स्थिताया दीनाया जानक्या रामं प्रत्यवलोकनम् ।[1] रावणस्याऽट्टहासः । रामो व्याकुलतां नाटयति । अश्रुमोचनं करोति)

हनूमान् : प्रभोर्नयनाभ्यामश्रुपातः ! धिङ्माम् ! मयि जीवति प्रभोश्चेतसि पीडा ! अयमहं समस्तं व्योम एव ग्रसिष्यामि ! पश्यामि च, कथं नाम श्रीरामस्य किमपि व्यथाकारणं कुत्राप्यवशिष्यते ?

(इति सक्रोधमाकाशोत्पतनं सूचयति)

(नेपथ्ये **शंकरध्वनिः** देवि ! महानाशो भावी । स्वतेजः संवृणु । नायं हनूमान् साधारणः कपिरपितु चिरब्रह्मचारी, मर्यादापुरुषोत्तमरामस्यार्चनायाः साक्षाद्विग्रहः । अमुं तेजसा प्रहरन्ती त्वं पराजयं लप्स्यसे ! विद्यामाश्रित्यैनं प्रबोधय । अयं नम्रतामङ्गीकरिष्यति । संकटं दूरीभविष्यति । त्वरस्व देवि ! त्वरस्व ।

(गर्जनादिध्वनिः)

देवीध्वनिः : युक्तं भणसि महादेव ! अहमञ्जनारूपं धृत्वा प्रबोधयामि हनूमन्तम् ।)

(अञ्जना प्रकटीभवति)

अंजना : वत्स हनूमन् ! हनूमन् ! किमिदं व्यवस्यते त्वया ?

हनूमान् : अये ! ममाम्बा ! प्रणमामि मातः !

अंजना : वत्स ! चिरञ्जीव ! किमिदमकार्यमनुष्ठीयते त्वया ? ननु आकाशं ग्रसितुं तत्परोऽसि ?

---

१. अत्र यथासौविध्यं निर्देशकेन योजना कार्या ।

हनूमान् : सम्यग् लक्षितमम्बया ! अद्य मया भगवतो रामस्य नेत्रयोः अश्रुकणाः वीक्षिताः। मयि जीवति स्वामी यदि पीडया साश्रुनयनो भवति तदा धिङ्माम् ! अहं निखिलमपि विश्वं ग्रसिष्यामि ! रामाय कष्टदाता न कोऽपि कुत्राप्यवशिष्येत !

अंजना : पुत्र ! नेदमकार्यं कर्तुमर्हसि।

हनूमान् : कथमकार्यम् ? किमत्र अकार्यत्वम् ? ननु पश्यत्वत्रभवती कथं सुकरतया ग्रस्यते मयाकाशः।

अंजना : अलमलमनेन शौर्यप्रदर्शनेन ! शैशवे रविं ग्रसित्वा त्वया जगत् अन्धकारे निमज्जितम्। अधुना यौवने च आकाशमेव ग्रसितुमनाः सन् श्रीरामस्य अहितमाचरसि !

हनूमान् : श्रीरामस्य अहितम् ? कथमेतत् ? तत्प्रीतय एव तु अहमाकाशं कवलीकर्तुमिच्छामि ! समस्तेऽपि ब्रह्माण्डे श्रीरामस्य शोककारणमहं स्थातुं नानुमंस्ये।

अंजना : बलनिधानमसि इत्यहं जाने ! इत्यपि जानामि यत्सर्वमपि चिकीर्षितमनुष्ठातुं समर्थोऽसि ! किन्तु मूढ ! किं त्वं जानासि यन्महाकाशे भगवतः श्रीरामस्य आराध्यदेवो देवाधिदेवो भगवान् शंङ्करो निवसति। भगवान् श्रीरामस्तु शंकरं पूजयति, त्वं च स्वस्वामिनस्तम् इष्टदेवमेव ग्रसितुमुपक्रमसे। धन्योऽसि पुत्र ! किं रघुनन्दनेन एवं कर्तुमाज्ञप्तोऽसि ? किं श्रीरामोऽस्मिन् कर्मणि असमर्थ आसीत् यत्त्वामत्र स न्ययूयुजत् ? तव एतादृशैः कृत्यैरहं नताननां भवामि ! एतस्माद् असतो मनोरथात् स्वमनो निवर्तय ! बलनिधान ! बुद्धिनिधानमपि भव ! स्वस्वामिनोऽभिप्रायमज्ञात्वैव अत्युत्साह-

कृतानि अकार्याणि कुर्वाणाः सेवकास्तस्य यशो दूषयन्ति। न च त्वं तथा भूयाः। गच्छ श्रीरामस्य अन्यैः कृत्यैः सेवामाचर।

हनूमान् : मातः। सम्यगवबोधितोऽस्मि ! मया तु विस्मृतमेवासीत् यन्ममेष्टदेवस्यापीष्टदेवस्य भगवतः शंकरस्यावासभूतो महाकाशः। तत्प्रतिनिवर्ते ! अम्ब ! अनुजानीहि प्रतिनिवर्तितुम्।

अंजना : वत्स ! शुभं ते भूयात्।

(अंजना निलीयते। शान्तो हनूमान् अवतारं सूचयति)

(स्थानम्: पूर्वोक्तम्। हनूमानागत्य श्रीरामचरणयोर्निकटे उपवशति। श्रीरामः शान्तश्चिन्तितो विषण्णश्चास्ति।)

विभीषणः : रघुवीर ! अद्य निसर्गप्रसन्नं भवद्वदनकमलं सविशेषं चिन्ताम्लानमिव कथं वीक्ष्यते ?

हनूमान् : सत्यमाह विभीषणः। किञ्चित्कालपूर्वमत्रभवतो नेत्राभ्यामश्रूण्यपि पतन्ति स्म।

रामः : सखे विभीषण ! मन्दभाग्योऽस्मि ! रणे विजयं लब्धुमनीशोऽस्मि ! इयमेव चिन्ता आकुलीकरोति माम् !

विभीषणः : रघुवीर ! किमिदमसामयिकमुदीर्यते ? ननु त एव अमोघप्रतापाः भवतः शराः तूणीरमध्यासते, तदेव संकटसहनक्षमं वक्षः, तावेव रणकुशलौ हस्तौ, तदेवामितं बलम्, स एव समरे मघनादजयी सुमित्रानन्दनः, स एव ऋक्षराजः, स एव प्रमना सुग्रीवः, स एव महावलोऽङ्गदः, स एव अबु दसम एको वीरो महावीरो हनूमान्, ते एव दक्षा सेनानायकाः, तदेव समरम् ! सत्स्वपि एतेषु विजयसम्भारेषु कथं सन्दिहानो लक्ष्यते भवान् विजयविषये ?

रामः : विभीषण ! न भवता ज्ञातुं शक्यते । सत्स्वपि विजय-सम्भारेषु विजयो दुर्लभः । भग्नोत्साहोऽस्मि ! क्षीणाशोऽस्मि !

विभीषणः : रघुकुलगौरव ! कथं लाघवमापन्नोऽसि ? न युज्यते इयं दीनता तस्मिन् क्षणे यदा विजयश्रीः भवतः स्वागतं कर्तुं सन्नद्धा तिष्ठति ! अस्मिन् काले औदासीन्यं नावलम्बनीयम् । मन्दोत्साहता नाङ्गीकरणीया । ननु स्मरति भवान् भवता भवदनुसर्तृभिश्च कियान् श्रमो विहितो लङ्कां जेतुम् । जानक्या समाचारमानेतुं हनुमता कियत् साहसं कृतम् ! भवता च जानकीं रावणपाशात् विमोचयितुं किं किं न सोढम् ! अल्पीयसैव कालेन भवान् जानकीं प्राप्स्यति ! सा भवद्दर्शनं प्रतीक्षते । भवांश्चावसादमङ्गीकृत्य तस्या दूरं पलायितुमीहते !

रामः : विभीषण !

विभीषणः : रघुवीर ! सत्यमहं भणामि । यदि भवानस्मिन् क्षणे मन्दोत्साहतां भजते तर्हि जानकी अत्यन्तं विपद्ग्रस्ता भविष्यति । कल्मषो रावणः, खलो रावणः, गताचारो रावणः, हितोपदेशं कुर्वति मयि पादप्रहारी रावणः अशोकवाटिकायां सीतां पुनरपि क्लेशयिष्यति; पारिषद्यैः परिवृतः स्वजयकथां कथयिष्यति, वसन्ततौ उपवने विस्रब्धं पिकानां कलकूजनं समाकर्णयिष्यति···यद्येवं भवान् मन्दोत्साहो भवति! ननु स्मर्यताम्- भवताहं 'लङ्केश' पदेन सम्बोधितः । अपि नामाहं लंकेशः संवृत्तः ?

(सभा निस्तब्धतां नाटयति ।)

रामः : (दीर्घं निःश्वस्य) सखे विभीषण ! समरे जयोऽस्माभिर्न लप्स्यते ? नेदमधुना नरवानराणां राक्षसेन सह युद्धमवसितम्। रावणेनामन्त्रिता महाशक्तिरधुना रावणपक्षे सम्मिलिता। महाशक्त्या सह नरवानराणां युद्धं कथं सम्भाव्यते ? हन्त ! यत्रैवान्यायस्तत्रैव महाशक्तिरपि संयुक्ता ! महाशक्ते ! किमिदमनुष्ठीयते भवत्या ?

(इत्यश्रूणि मुञ्चति। कण्ठावरोधं नाटयति। लक्ष्मणस्तेजश्चमत्कृतिं नाटयति। हनूमान् विवशतां, जाम्ववान् गम्भीरतां स्थितिज्ञतां च, सुग्रीवो व्याकुलतां, विभीषणश्च कार्यक्रमनिश्चयं नाटयति)

रामः : (संयतः सन्) न ज्ञातुं पारये दैवीविधानपरम्पराम् ! देव्या महाशक्त्याः कृते अधर्मरतोऽपि रावणः स्वकीयः संवृत्तः, अहं चापरः सञ्जातः ! शिव शिव ! अयं क्रीडाविलासः शक्तिदेव्याः !

सर्वे : (औत्सुक्यं गंभीरतां च नाटयन्ति)

रामः : अद्य रणे मया मुहुर्मुहुर्योजिताः निशिताः शराः खण्डिताः संवृत्ताः, श्रीहताः सञ्जाताः। त एव शराः प्रभावहीना अजायन्त यैरियं सम्पूर्णापि संसृतिर्जेतुमशक्यत, यैश्च समस्तापि सृष्टिः विपद्भ्यस्त्रातुमशक्यत; ये च घातकपतनसंस्कारयुता आसन्; येषु च क्षात्रधर्मस्य पूर्णाभिषेकोऽस्ति। ये च प्रजापतीनां संयमैः अरक्ष्यन्त !

सर्वे : (गंभीरतामौत्सुक्यं च नाटयन्ति)

रामः : मयाद्य रणे दृष्टं यन्महाशक्तिः रावणं स्वांके दधानास्ति तथैव, यथा शशी कलङ्कं धारयति। सा मया क्षिप्तान् मन्त्रपूतान् शरान् हेलयैव संवृणोति ! सर्वेऽपि मामकीना अमोघा बाणाः लक्ष्ये मोघा अजायन्त ! यथा यथाऽहं

कपिदलं व्याकुलं वीक्ष्य युद्धाय क्रुद्धोऽभूवम् तथा तथा देव्याः दृग्भ्यो ज्वलद्वह्निज्वालेवादृश्यत ! अथ सा मामीक्षितुमारभत ! तस्या अवलोकनेनाहं स्तब्ध इवाभवम् ! धनुराकर्षणस्य मम शक्तिः क्वचिद्विलुप्ता ! बद्ध इवाहं संवृत्तः । त्रस्त इवाहं सञ्जातः । महाशक्ते ! किमिदं भवत्या आरचितमद्य ! किमिदं व्यवसितं भवत्या ! यदा भवती एव अन्यायपक्षपातिनी संवृत्ता तदा असहायोऽहं किं करोमि ? (निःश्वासं मुञ्चति)

जाम्ब० : रघुवर ! अलं चिन्तया ! नैवं विचलितो भवितुमर्हति । भवतापीयं शक्तिः धार्यताम् । आराधनस्य दृढतराराधनेनोत्तरं दीयताम् । संयतप्राणैः प्राणेषु विजयो व्रियताम् । यदि नाम रावणः अशुद्धः सन्नपि शक्तिबलेन भवन्तं त्रस्तमकरोत्तर्हि शुद्धस्तु भवान् सिद्धो भूत्वा तमवश्यमेव ध्वंसयिष्यति !

(रामः कञ्चिदुत्साहं रूपयति)

राघवेन्द्र ! भवतापि शक्तेः पूजा कल्प्यताम् । यावत्सिद्धिर्नैव लभ्येत, तावद् युद्धं त्यज्यताम् ! भवत्साधनाकाले लक्ष्मणोऽस्माकं महावाहिन्या नायकत्वेन स्थास्यति । अङ्गदः, अहं हनूमांश्च तस्य प्रधानसहायकत्वेन स्थास्यामः । नल-नीलौ, सुग्रीवो विभीषणः, अन्ये च यूथपतयस्तदादेशानुसारं यथावसरं स्वनियोगमशून्यं विधास्यन्ति ।

सर्वे : (उत्साहं प्रसन्नतां च रूपयन्ति)

रामः : ऋक्षपते ! एष भवतः शुभः कल्पः ! अवश्यं मया महाशक्तिराराधनीया !

(रामो ध्यानं निरूपयति। पुनश्च आवेगरहितस्वरेण देवीं मनसि कृत्य ब्रवीति) मातर्दशभुजे ! विश्वज्योतिः। तव शरणागतोऽस्मि !

(फ्लेशबैकपद्धत्या देव्याः महिषासुरमर्दि रूपं प्रदर्शयितुं शक्यते)

तव शक्त्या विद्धः सन् खलो महिषासुरः मर्दितोऽभूत्। धन्योऽसौ तव चरणतलगतो गर्जन् सिंहः। मातः ! गृह्णामीङ्गितम्। नूनमयं सिंहो मम प्रतीकभूतः। अहं अयमिव निर्भीकः सन् त्वां वोढा।

(रामो ध्यानं निरूपयति। देवीच्छविलीनतां रूपयति। यद्यस्मिन्नवसरे देव्या रूपं प्रदर्शयितुं शक्यते तर्हि शोभनं भवेत्। सर्वे वीराः रामस्य भावस्मितमाननं पश्यन्ति।)

रामः : (धीर-गंभीरस्वरेण) बन्धुवराः। ननु पश्यत। पुरतो योऽयं शतहरितगुल्म-तृणैः श्यामलः सुन्दरो भूधरः शोभते स एव पार्वती-रूपेण प्रतिभाति। चरणप्रान्ते गर्ज्जन्नयं सिन्धुर्नास्ति अपि त्वयं देव्याः सिंहोऽस्ति। दश दिशोऽस्या हस्ताः सन्ति। मनागूर्ध्वं पश्यत। अम्बरे दिगम्बरः शशिशेखर अर्चित इव दृश्यते ! इदं महाभावमङ्गलं वीक्ष्य मानवमनसि वसानस्य असुरभावस्य गर्वः खर्वतां याति ! जय जय हे महिषासुरमर्दिनि। जय जय शैलसुते ;

(यथासैविध्यमत्र कस्यचित् देवीस्तोत्रस्य पाठः कारयितुं शक्यते अथवा 'पूर्वध्वन्यंकितं' (Pre-recorded) स्तोत्रं नेपथ्येन प्रस्तोतुं शक्यते। पात्राणि तदनुरूपम् ओष्ठसञ्चालनं भावाभिनयं वा कर्तुं शक्नुवन्ति)

(मधुरदृष्ट्या हनूमन्तमाकर्षन्निव, प्रियतरस्वरेण हनूमन्तं

प्रति) कपिवर ! अस्मभ्यमष्टोत्तरशतमिन्दीवराण्यपेक्ष्यन्ते। यद्यधिकानि लभामहे तर्हि अधिकस्याधिकं फलम् ! प्रियवर ! उषःकाले एव सत्वरं देवीदहं गत्वा इन्दीवराण्यवचित्यानय। तदनन्तरं रणे गत्वा स्वपराक्रमं प्रदर्शय ! देवीदहस्य मार्गं, दूरतां स्थितिं च ते जाम्ववान् कथयिष्यति। कथं मन्यते ऋक्षपतिः ?

जम्ब० : युक्तमाह राघवेन्द्रः। (हनूमन्तं प्रति) हनूमन् ! अहं देवीदहस्य विषये यथाभिलषितां सूचनां तुभ्यं दास्यामि !

हनूमान् : अनुगृहीतोऽस्मि यत्प्रभुणास्मिन् पुण्यकर्मणि नियुक्तोऽस्मि। (श्रीरामस्य चरणौ स्पृशति। पदरजः शिरसि धारयति। जाम्बवान् तस्मै देवीदहमार्गनिर्देशं नाटयति। हनूमान् प्रतिष्ठते)

रामः : बान्धवाः ! अतिकालः सञ्जातः। गच्छत, यूयमपि विश्रामं कर्तुमर्हथ।

सर्वे : विजयताम् श्रीराघवेन्द्रः ! (इति निष्क्रान्ताः)

(सूर्योदयपूर्ववेलायामरुणा। शनैः शनैः सूर्योदयः। रामः पूजासनमध्यास्ते। हस्ते धनुर्बाणौ न स्तः। जटाः बद्धा न सन्ति। हनूमान् आगच्छति)

हनूमान् : भगवन् ! इमानि अष्टोत्तरशतमिन्दीवराणि देवीदहतः समानीतानि।

रामः : साधु कपिवर ! साधु !

हनूमान् : इदानीं को नियोगोऽनुष्ठीयताम् ?

रामः : वत्स गच्छ ! त्वमपि रणे सैन्यसाहाय्यं कुरु। अहमपि एकान्तमिच्छामि। आराधनां प्रारभे।

(नेपथ्ये रणकोलाहलः श्रूयते किन्तु रामः शान्तभावेन पूजायां रतोऽस्ति। पूजोपरान्तं दशभुजाया दुर्गाया नामानि जपति। मनसि देव्या नाम्नां गुणग्रामाणां मननं करोति। नाट्यनिर्देशककौशलेन देव्याश्छवयोऽपि 'स्लाइड-प्रयोगेण' 'जालप्रतिसीरा'-प्रयोगेण वा प्रदर्शयितुं शक्यन्ते रामः करमालया (अथवा रुद्राक्षमालया) एकजपस्य क्रमं पूरयित्वा एकैकं कमलमिष्टदेव्यै समर्पयति।)

वाचकः : एवं श्रीरामो देव्याः समाराधने तत्परोऽस्ति। गहनाद् गहनतरं समाराधनमनेन सम्पाद्यते। पञ्चदिवसाः अनेन क्रमेण व्यतीताः।

मूलाधारतः ऊर्ध्वतरं स्थितेषु चक्रेषु अस्य मनः सञ्चरते। जपानन्तरमेकमिन्दीवरमिष्टदेवतायै समर्पयति। एवं हि निजपुरश्चरणं पूरयितुमयं साधनायामग्रे सरति।

षष्ठे दिवसेऽस्य मनः आज्ञाचक्रे समाहितम्। प्रतिजपं महदाकर्षणं सिद्ध्यति। अस्य ध्यानं त्रिकुट्यां सञ्चितम्। उभे नेत्रे देव्याश्चरणयुगं पश्यतः। जपप्रतापेन अम्बरं कम्पमानं भवितुमारब्धम्। दिनद्वयं यावत् श्रीरामः एकासने तस्थौ। जपानन्तरं इन्दीवरं समर्पयति। अष्टमे दिवसे ध्यानस्थं मन ऊर्ध्वोर्ध्वतरं संक्रममाणं ब्रह्माच्युत-शंकराणां स्तरमतिक्रमते। तेन सकलमपि ब्रह्माण्डं जितम्। देवता स्तब्धाः सञ्जाताः। तपःप्रभावात् जीवनस्य आरम्भाः दग्धाः सञ्जाताः! सप्तोत्तरैकशतम् इन्दीवराणि यथाविधानमद्यावधि पुरश्चर्याक्रमानुसारं जपानन्तरं दुर्गादेव्यै समर्पितानि। केवलमेकमेवारविन्द-मवशिष्यते। मनः सहस्रारचक्रं वेद्धुं सन्नद्धम् अस्ति।

निशीथे साक्षाद्भगवती दुर्गा आयाति। सहासं च पूजा-कमलं स्वकरेणैव गृहीत्वा विलीयते।

श्रीरामोऽन्तिमं जपं पूरयति। ध्याने जगज्जनन्या-श्चरणयुगलं पश्यन् निमीलितनयनः श्रीरामः कमलमाहर्तुं करमर्पयति। हन्त! तत्र कमलं नास्ति। अस्य मनः किञ्चित् चञ्चलतां भजते।

रामः : (नेत्रे उन्मीलयति। कमलमनवलोक्य मनाग् आतुरतां नाटयति।) अयं जपपूरणकालः। आसनत्यागाच्चासिद्धिः। किन्नु खलु करोमि!

(रामस्य प्रीरिकार्डडध्वनिः)

(रामः साश्रुजलनयनतां नाटयति)

रामस्य ध्वनिः : धिगिदं जीवनम्। यद् विरोधमेव आप्नोति! धिङ् मम साधनाम्! यदर्थमेतावान् शोधो विहितः। (सकरुणं) जानकि! तवोद्धारः कर्तुं मया नापार्यत!

वाचकः : किन्तु क्षणविक्षोभेणानेन राघवेन्द्रस्य मनः पराजयं न स्वीकुरुते। तन्मायावरणं भित्त्वा बुद्धिदुर्गमुपतिष्ठते। विद्युद्गत्या श्रीरामस्य मनः किञ्चित्स्मरति।

रामस्य ध्वनिः : लब्धो मयोपायः। शैशवे माता मां सदैव राजीवलोचनं व्याहरति स्म। एवमधुनापि द्वे नीलकमले मत्सकाशे अवशिष्येते। मातर्भगवति दुर्गे! एक नयनकमलं समर्पयित्वा पुरश्चरणमिदं पूरयामि। गृहाण एतन्मे अन्तिमं पुरश्चरणकमलम्। (इति / तूणीरस्थं ब्रह्मशरं पश्यति। तं च वामकरेण गृह्णाति। दक्षिणकरेण दक्षिणं नेत्रं स्पृशति। बाणेन लोचनं निस्सारयितुकामो भवति। अस्मिन्नेवान्तराले देवो आविर्भवति।)

देवी : (वरदमुद्रया) साधु साधक-धीर राम ! साधु ! धर्मधन, धन्योऽसि ! तवानेन दृढनिश्चयेन पूर्णेन तपसा च प्रीतास्मि ! पुरुषोत्तम ! ते विजयः सुनिश्चितः । एषाहं त्वयि विलीना भवामि । उत्तिष्ठ हे सद्धर्मप्रतीक ! अन्यायं जेतासि !

(राम उत्साहं दृढनिश्चयं च सूचयन्नुत्तिष्ठति । धनुर्गृह्णाति । सर्वे हनूमदादयः आगत्य प्रसन्नतां सूचयन्ति । सामूहिकस्वरेण गायन्ति अथवा ध्वनियन्त्रेण पूर्वाङ्कितं देवीस्तोत्रं नेपथ्यतः श्रावयितुं शक्यते तदनुसारं च पात्राणि भावाभिनयं सूचयन्ति :

यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च नहि वक्तुमलं बलं च ।
सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु ॥)

मुद्रक : देववाणी प्रिण्टर्स उत्तम नगर, नयी दिल्ली-११००५९

देववाणी-परिषदा प्रकाशिता ग्रन्थाः

१.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
२.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० ६.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा०स्वामिनाथन्)	रु० ४०.००
४.	श्रीकृष्णचरितम् (डा० रमेशचन्द्र शुक्लः)	रु० ३०.००
५.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
६.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
७.	आभाणकमञ्जरी (,, ,,)	रु० १५.००
८.	मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा)	रु० २०.००
९.	रघुवंश : एक विश्लेषण (,, ,,)	रु० २०.००
१०.	अभिज्ञानशाकुन्तल : एक विश्लेषण (,,)	रु० २०.००
११.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
१२.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,)	रु० ३०.००
१३.	,, ,, ,, (द्वितीय खण्डः) (,,)	रु० ३०.००
१४.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
१५.	अभिनवहनुमन्नाटकम् (डा० रमेशचन्द्र शुक्लः)	रु० २०.००
१६.	अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
१७.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ४०.००
१८.	संस्कृत साहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित)	रु० १५०.००
१९.	साधारणीकरण और समानान्तर चिन्तन (डा० सुलेखचन्द्र शर्मा)	रु० २०० ००
२०.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
२१.	रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया)	रु० ६०.००
२२.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
२३.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२४.	सर्फूतिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२५.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२६.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२७.	सुरश्मिकाश्मीरम् (,,) (,,)	रु० २०.००
२८.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२९.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु० १०.००
३०.	महाप्रयाणम् (श्रीकृष्ण सेमवालः)	रु० २०.००
३१.	पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः)	रु० २०००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

दूरभाष : ५५३४९९